# संस्कृतवार्ता:

दिनाङ्कः-30.12.2025

प्रातः - 06:55

<u>सर्वोच्चन्यायालय-अरावली</u>

सर्वोच्चन्यायालयेन नवम्बरमासस्य विंशतिदिनाङ्के अरावलीपरिधि-परिभाषायाः प्रकरणे प्रस्तुतः स्वकीयः आदेशः स्थगितोऽस्ति। मुख्यन्यायाधीशः सूर्यकान्तः, न्यायमूर्तिः जे. के. माहेश्वरी अथ ए. जी. मसिह इत्येतेषां पीठेन अरावल्याः पर्वतत्वेन प्रदत्तपरिभाषायाः परीक्षणार्थं नूतन-विशेषज्ञ-समित्याः गठनस्य आदेशो दत्तः। स्वस्य निर्णये सर्वोच्चन्यायालयः अवदत् यत् पूर्वानुमोदितासु परिभाषासु स्पष्टीकरणम् आवश्यकम् अस्तीति। न्यायालयः अवदत् यत्, केचन विषयाः सन्ति येषु स्पष्टीकरणस्य आवश्यकता भविष्यति। न्यायालयेन केन्द्राय, चतुर्भ्यः राजस्थान-गुजरात-दिल्ली-हरियाणादिभ्यः अरावली-राज्येभ्यश्च सूचना दत्ता, येन अस्मिन् विषये स्वप्रेरणया प्रकरणस्य विषये तेषां प्रतिक्रिया आगच्छेदिति। विषयेऽस्मिन् न्यायालयेन विचारणीय-विषयत्वेन स्वयमेव संज्ञानं गृहीतमासीत्। केन्द्रीय-पर्यावरण-वन-ऋतुदशा-परिवर्तन-मन्त्री भूपेन्द्र-यादवः अरावली पर्वतमाला-सम्बद्धं सर्वोच्च-न्यायालयस्य निर्णयं स्वागतयोग्यं प्रत्यपादयत्।

<u>प्रधानमन्त्री-नीति-आयोग</u>

प्रधानमन्त्री नरेन्द्रमोदी अद्य नीति-आयोगे प्रमुख-अर्थशास्त्रज्ञैः विषय-विशेषज्ञैः च सह मेलनं करिष्यति, यत् प्रमुख-आर्थिक-निर्णयानाम् प्राक् सर्वकारस्य वर्तमान-परामर्शस्य अंशः अस्ति। वित्तमन्त्री निर्मला सीतारामनः अपि अस्मिन् संवादे भागं ग्रहीष्यति, यस्मिन् विविध-आर्थिक-विषयेषु ध्यान-प्रदानस्य अपेक्षा अस्ति। देशस्य वर्तमान-आर्थिक-स्थितिं, भविष्यस्य प्राथमिकतायाः च विषये स्व-विचारान्, मूल्याङ्कनं च निवेदयितुं विशेषज्ञानां कृते एषा सभा मञ्चरूपेण कार्यं करिष्यति इति सम्भावना अस्ति।

<u>शिवराज-जी.राम.जी</u>

कृषि-कृषक-कल्याण-ग्रामविकास-मन्त्रिणा शिवराज-सिङ्घ-चौहानेन ह्यः उक्तं यत् केन्द्र-सर्वकारेण महात्मागान्धी-राष्ट्रिय-ग्रामीण-रोजगार-प्रत्याभूति-अधिनियमे मनरेगा पञ्चोत्तर-द्विसहस्र इत्यस्मिन् समाह्वानान् अनियमिततां च परिहर्तुं विकासित-भारत-जी-राम्-जी इति नूतनः विधिः प्रवर्तितः अस्ति। उत्तराखण्डस्य गौचर-नगरे पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य राज्यस्तरीय-कृषि-दिवस-कार्यक्रमे मन्त्री भाषमाणः आसीत्। सः अवदत् यत् नूतनेन विधिना सुनिश्चितः वृत्यावसरः शत-दिवसात् पञ्चविंशत्यधिकैकशत-दिनानि यावत् वर्धितः अस्ति।

अमितशाह:-बंगाल

केन्द्रीय-गृह-मन्त्री तथा भाजपेति दलस्य वरिष्ठः नेता अमितशाहः, विभिन्नासु सङ्घटन-सभासु कार्यक्रमेषु च भाग-ग्रहणाय गतरात्रौ पश्चिमवङ्गप्रदेशे संप्राप्तवान्। स्वयात्रावधौ, गृहमन्त्री अद्य श्वः च राज्यदलस्य पदाधिकारिभिः सह आगामि निर्वाचनानां निर्वाचन-कार्यनीतीनां विषये चर्चयितुम् अनेकाः उच्च-स्तरीय-सभाः करिष्यति। तस्य प्रथमं प्रमुखं सङ्घटन-सभा अद्य अपराह्णे बिधान-नगरे भविष्यति।

नायडू-ध्रुव उदग्रविमान

केन्द्रीय-नागरिक-उड्डयन-मन्त्री किञ्जरापु-राममोहन-नायडुः अद्य बेङ्गलूरुनगरे ध्रुव्-एन्. जी. उदग्रविमानस्य प्रथमं उद्घाटन-उड्डयनं हरितध्वजं प्रदर्शयिष्यति। एड्वान्स्ड्-लाइट-हेलिकाप्टर-नेक्स्ट्-जनरेशन्-ध्रुव उदग्रविमानस्य स्वदेशी-उदग्रविमानस्य नागरिक-संस्करणम् अस्ति यत् पञ्चविंशत्यधिक द्विसहस्रतमे वर्षे एरो-इण्डिया-प्रदर्शने एच्. ए. एल. इत्यनेन प्रदर्शितम् आसीत्।

औद्योगिकोत्पादनवृद्धिः

देशस्य औद्योगिकोत्पादनवृद्धिः अस्मिन् वर्षे नवम्बर्-मासे वार्षिकरूपेण सप्त-दशमलवोत्तर-षट् प्रतिशतं यावत् वर्षद्वयोः उच्चस्तरे अस्ति। सांख्यिकी-कार्यक्रम-कार्यान्वयन-मन्त्रालयेन प्रकाशितस्य दत्तांशस्य अनुसारं औद्योगिक-उत्पादन-सूचकाङ्कः आई.आई.पी. इति उत्तमरूपेण पुनरागमनं कृतवान्, यत् अक्टूबर्-मासे पञ्च-दशमलवोत्तर-शून्य प्रतिशतं यावत् उन्नतः संशोधितः दरः आसीत्।

महिला-क्रिकेट

महिला-क्रिकेट्-क्रीडायां, अद्य तिरुवनन्तपुरम्-नगरे विंशति-प्रति- विंशति-अन्ताराष्ट्रिय-क्रीडा-श्रृङ्खलायाः पञ्चमान्तिम-स्पर्धायां भारतीय-दलं श्रीलङ्का-दलं सम्मुखीकरिष्यति। क्रीडायाः आरम्भः भारतीय-समयानुसारं सायं सप्तवादने भविष्यति।